Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५१३

Title सौभाग्य कवचम्.
वामकेश्वरतन्त्रे

Author ०

Extent ५ Age ०

Subject तन्त्रम्

सौभाग्यकवचम् वामकेश्वरतंत्रे

४५१३

4513

F. = 5

सौभाग्यकवच ७२
५

॥ सौ० क० ॥ श्रीगुरुभ्यो नमः ॥ ॐ श्री ॥ कैलासशिखरे रम्ये सुखासीनं सुरार्चितं ॥ गिरीशं गिरिजा न
॥१॥ त्वा स्तोत्रैर्वेदार्थगोचरैः ॥१॥ प्रणम्य परया भक्त्या तमपृच्छत्कृतांजलिः ॥ श्रीदेव्युवाच ॥ र
रहस्यं रक्षणकरं सर्वसंपत्करं वद ॥२॥ ईश्वर उवाच ॥ एतत्सौभाग्यकवचं रहस्यातिरहस्य
कं ॥ सौभाग्यकवचं देवि शृणु सौभाग्यदं परं ॥३॥ शिखायां सततं पातु महात्रिपुरसुंदरी ॥ शि
रः कामेश्वरी नित्या ललाटं पूर्वं भगमालिनी ॥४॥ नित्यक्लिन्ना च तद्दक्षं भेरुंडा पश्चिमं शिरः ॥ वह्निवा
सिन्यस्य वामं वज्रेश्वर्यग्रकं तथा ॥५॥ शिवदूती ललाटं च त्वरिता तस्य दक्षिणं ॥ तत्कामपार्श्व
मवतात्तु यैव कुलसुंदरी ॥६॥ नित्या पातु भ्रुवोर्मध्यं भ्रुवं नीलपताकिनी ॥ वामभ्रुवं च विजया
नयनं सर्वमंगला ॥७॥ ज्वालामालिन्यक्षि वामं विचित्रा रक्षतु नासिकां ॥ दक्षश्रोत्रं तु गणपः ॥ शिव ॥
स्वयं पातु महेश्वरः ॥८॥ दक्षसव्यं तु वटुकः कपोलं क्षेत्रपालकः ॥ दक्षनासापुटं दुर्गा तदन्यं ॥१॥

पातु भारती ॥ ९ ॥ अणिमा दक्षिणांशं खं महिमा च तदन्यकं । दक्षगंडं तु गरिमा लघिमा
चोत्तरं तथा ॥ १० ॥ ऊर्ध्वमोष्ठं प्राप्तिसिद्धिः प्राकाम्यमधरोष्ठकं । ईशित्वमूर्ध्वदन्तांश्च वशित्वमध
रोस्तथा ॥ ११ ॥ इच्छासिद्धिस्तु रसनां मोक्षसिद्धिस्तु तालुकं । तालुमूलद्वयं ब्राह्मी माहेश्वरी च र
स्तां ॥ १२ ॥ कुमारी चिबुकं पातु तदधः पातु वैष्णवी । कंठं रक्षतु वाराही इंद्राणी रक्षतादधः ॥ १३
कृकाटिकां तु चामुंडा मस्तं लक्ष्मीस्तु सर्वतः ॥ सर्वसंक्षोभिणी मुद्रा स्कंधं रक्षतु दक्षिणं ॥ १४
तदन्यं द्राविणी मुद्रा पायाद् दंसद्वयं क्रमात् ॥ आकर्षवश्यमुद्रे द्वे चोन्मादिन्यपि दक्षिणं ॥ १५ ॥ भु
जं महांकुशा वामं खेचरी दक्षकक्षकं ॥ वामकक्षं बीजमुद्रा योनिः स्याद् दक्षबाहुकं ॥ १६ ॥ लस
त्रिखंडिनी मुद्रा वामबाहुं प्रपातु येन ॥ कामाकर्षिणिका नित्यं रक्षताद् दक्षकूर्परं ॥ १७ ॥ कूर्परं वा
ममवताद् बुद्ध्याकर्षिणिका तथा ॥ अहंकाराकर्षिणी तु प्रकोष्ठं पातु दक्षिणं ॥ १८ ॥ शब्दाकर्षि

॥सौ०क० णिका वामं स्पर्शाकर्षिणिकावतु ॥ तन्मध्यं दक्षिणं पातु रूपाकर्षिणिके तरं ॥१९॥ रसाकर्षिणि

॥२॥ का पातु मणिबंधं च दक्षिणं ॥ गंधाकर्षिणिका वामं चित्ताकर्षिणिकावतु ॥२०॥ करभं दक्षिणं धैर्या

कर्षिणी पातु वामकं ॥ स्मृत्याकर्षिण्यस्यैषा पाणिं नामाकर्षिण्य दक्षिणं ॥२१॥ बीजाकर्षिण्य सो पायात्

स तलं दक्षिणांगुलीः ॥ आत्माकर्षिण्य दक्षिण्या अमृताकर्षिणी नखान् ॥२२॥ शरीराकर्षिणी वामनखा

न् रक्षतु सर्वदा ॥ अनंगकुसुमा शक्तिः पातु दक्षस्तनोपरि ॥२३॥ अनंगमेखला वाम्यां न्यस्तनोर्ध्वमर

2 क्षतु ॥ अनंगमदना दक्षस्तनं तच्चूचुकं पुनः ॥२४॥ रक्षताद्घने शं देवी ह्यनंगमदनातुरा ॥ अनं

गरेखा वामं च वक्षोजं तस्य चूचुकं ॥२५॥ अनंगवेगिनी क्रोडमनंगस्यांकुशावतु ॥ अनंगमालि

नी पायाद्वक्षस्थलमहर्निशं ॥२६॥ सर्वसंक्षोभिणी ह्रच्च सर्वविद्राविणी परा ॥ कुक्षिं सर्वाकर्षि ॥शिव॥

णी तु पातु पार्श्वं तु दक्षिणं ॥२७॥ आह्लादिनी वामपार्श्वं मध्यं संमोहिनी परं ॥ सा सर्वस्तंभिनी पृष्ठं ॥२॥

नाभिं वै सर्वजृंभिणी ॥२०॥ वशंकरी वस्तिदेशं कटिं सा सर्वरंजिनी ॥ उन्मादिनी तु सर्वाद्या
पायाज्जघनमंडलं ॥२१॥ सर्वार्थसाधनी शक्तिर्नितंबं रक्षतादियं ॥ दक्षस्फिचं सदा पातु सर्व
संपत्प्रपूरिणी ॥२२॥ सर्वमंत्रमयी शक्तिः पातु वामं स्फिचं मम ॥ पायात्कुकुंदरद्वंद्वं सर्वद्वंद्वक्षयं
करी ॥२३॥ सर्वसिद्धिप्रदा देवी पातु दक्षिणवक्षणं ॥ सर्वसंपत्प्रदा देवी तदन्यं पातु वंक्षणं ॥२४॥
सर्वप्रियंकरी देवी गुह्यं रक्षतु मे सदा ॥ मेढ्रं रक्षतु मे देवी सर्वमंगलकारिणी ॥२५॥ सर्वकामप्रदा
देवी पातु मुष्कं तु दक्षिणं ॥ पायात्तदन्यं देवी तु सर्वदुःखविमोचिनी ॥२६॥ सर्वमृत्युप्रशमनी देवी
पातु गुदं मम ॥ पातु देवी देहमध्यं सर्वविघ्ननिवारिणी ॥२७॥ सर्वांगसुंदरी देवी रक्षतादक्षसक्थि
कं ॥ वामसक्थितलं पायात्सर्वसौभाग्यदायिनी ॥२८॥ अष्ठीवन्तं मम सर्वज्ञा देवी रक्षतु दक्षिणं
॥ अन्याष्ठीवं सर्वशक्तिर्देवी पातु चिरं मम ॥२९॥ सर्वैश्वर्यप्रदा देवी दक्षजानुं सदावतु ॥ सर्वज्ञान

॥सौ०क॥ मयी देवी तदन्यज्ञानुरक्षतु ॥ ३८ ॥ जव्यादियं दक्षकंठं घां सर्वव्याधिविनाशिनी ॥ तदन्यां पातु दे
॥३१॥ व्यं तः सर्वाधारस्वरूपिणी ॥ ३९ ॥ सर्वपापहरा देवी दक्षगुल्फं सदावतु ॥ सर्वानंदमयी देवी वामगुल्फं
सदावतु ॥ ४० ॥ रक्षांघ्रिं वशिनी पातु पूर्वं वाग्देवता मम ॥ सर्वकामेश्वरी पूर्वं सदा वाग्देवतोत्तरं ॥ ४२ ॥
पार्श्वं मे दक्षिणं पायात्सर्वरक्षास्वरूपिणी ॥ अव्यात्सर्वं सदा पार्श्वं सर्वोन्नतफलप्रदा ॥ ४१ ॥ मो
दिनी प्रपदं पातु दक्षिणं विमलेतरं ॥ अंगुलीररुणा पातु दक्षपादनखोच्चया ॥ ४३ ॥ तदन्यात्रि
नी पायात्सदा वाग्देवतेतरं ॥ दक्षपादतलं सर्वेश्वरी वाग्देवता मुदा ॥ ४४ ॥ वामपादतलं पायात्त्रै
लोकिनी देवता मम ॥ कुर्वंतु ज्ञानगणा बाणास्ते ज्ञो क्याकर्षणं मम ॥ ४५ ॥ मोहं संहरता द्दिक्षु कोदंडं भृंगमौ
र्विकं ॥ करोतु सततं पाशी वशीकरणमुत्तमं ॥ ४६ ॥ विद्ध्यात्वं कुशानित्यं स्तंभनं शत्रुसंगरे ॥ पीठं मे का ॥शिव॥
मरूपाख्यं पातु कामान्निकामन ॥ ४७ ॥ पूर्णं पूर्णगिरेः पीठं पायाद्दर्शमदीयकं ॥ जालंधरस्य जालं ॥२॥

ध्रुवपीठं रक्षतु मे सदा ॥४८॥ सायुज्यं तनुतां प्राज्यं श्रीपीठं श्रीकरं मम ॥ कामेश्वरी चात्मतत्त्वं रक्षे
द्वज्रेश्वरी च मां ॥४९॥ विद्यातत्त्वं शैवतत्त्वं पायाद्भगमालिनी ॥ कामं क्रियाश्च हाश्च तु ममकृतार्थ व
मासनं ॥५०॥ क्रोधं बोधा पाहं हृन्मपद्मकपोतां बुजासनं ॥ जो मंदिव्यासनं मिंत्राद्व्यात्मा दिव्यरूप
माकं ॥५१॥ मोहं संहरतात्स्वर्क्कमर्दं मंत्रासनं महत् ॥ मासर्वं शाशये न्नित्यं मम सा ध्यासनं जगात् ॥५२
आधारं त्रिपुरा रक्षेत्स्वाधिष्ठानं पुरेश्वरी ॥ मणिपूरं महेशानी पायात्त्रिपुरसुंदरी ॥५३॥ अना
हतं मध्यं नित्यं त्रिपुरवासिनी ॥ विशुद्धं त्रिपुरा श्रीश्च आज्ञा त्रिपुरमालिनी ॥५४॥ इडां मे त्रिपु
रा सिद्धा त्रिपुरांबा च पिंगलां ॥ सुषुम्णां पातु मे नित्यं महात्रिपुरसुंदरी ॥५५॥ त्रैलोक्यमोहनं चक्रं
रोमकूपांश्च पातु मे ॥ सर्वाशापूरकं चक्रं सप्तधातूं स्वरक्षतु ॥५६॥ सर्वसंक्षोभणं चक्रं प्राणाद्यं
वायुपंचकं ॥ सौभाग्यदायकं चक्रं नागाद्यनिलपंचकं ॥५७॥ सर्वार्थसाधनं चांतःकरणानां चतुष्ट

॥ सो॰ क॰ ॥ यं ॥ सर्वरक्षाकरं चक्रं पायात्तुर्यष्टकं च मे ॥ ५८ ॥ सर्वरोगहरं चक्रं रक्तत्रिगुणत्रयं ॥ सर्वसिद्धिप्रदं
॥ ४ ॥ चक्रं मम व्यात्कोणपंचकं ॥ ५९ ॥ सर्वानंदमयं चक्रं यशः कीर्तिं च रक्षतु ॥ सौंदर्यमन्मथः पायादर-
तिः पातु रतिं मम ॥ ६० ॥ प्रीतिर्मे पातु सा प्रीतिकृन्नाहं च वसंतकः ॥ संकल्पं क[illegible]न्मको ह्यानं मह-
लक्ष्मीर्मम श्रियं ॥ ६१ ॥ कांतिं कापालिनी रक्षेद्वंदिं मालिनं ड पः ॥ पुत्रान्नृशंखनिधिः पायाद्भार्यां पद्म
निधिस्तथा ॥ ६२ ॥ मार्गे मां [illegible]भैरवी रक्षेन्मातंगी भुक्तं सदा ॥ अष्टदिक्षु महेंद्राद्याः सायुधाः पांतु स
र्वदा ॥ ६३ ॥ पायादूर्ध्वदिशं ब्रह्मा विष्णुश्चक्रायुधोऽप्यधः ॥ अनावृतानि स्थानानि कवचेन तु यानि मे ॥ ६४
तानि रक्षतु सततं शिवादिगुरवः क्रमात् ॥ एतत्सौभाग्यकवचं स्वकरे यस्तु धारयेत् ॥ ६५ ॥ त्रिसं-
ध्यं पठति श्रीत्वा शृणुयाद्वा समाहितः ॥ तस्य श्रीश्रेणि सिध्यंति सिद्धयस्त्वणिमादयः ॥ ६६ ॥ गुटिका ॥ शिव ॥
पादुका खड्ग सिद्धयः संभवंति च ॥ वश्यादीन्यष्टकर्माणि योगांगसंभवं ॥ ६७ ॥ ब्रह्मविष्णुगिरी ॥ ४ ॥

॥ सौ०क ॥५॥

द्वेऽकंदर्पश्चविभिः समः ॥ विहरत्यखिलान्लोकान्सिद्धगंधर्वसेवितः ॥ ६८ ॥ तस्यस्मरण
मात्रेण महाभूतपिशाचकाः ॥ कीटवत्संपलायंते कूष्मांडा भैरवादयः ॥ ६९ ॥ तस्यांघ्रितोयपत
नात्सुशाम्यंति महारुजः ॥ तस्मादेकमनाः सम्यक् रक्षोत्तेशाभिमर्शनात् ॥ ७० ॥ वशंभवति शीघ्रं
त्रैलोक्यं सचराचरं ॥ भूपालमहिलाभूपाः किमु मायाविमोहिताः ॥ ७१ ॥ ॥ इति श्रीवामके
श्वरतंत्रे नित्याषोडशार्णवे सौभाग्यकवचं समाप्तम् ॥ ॥ शुभमस्तु ॥ ॥ लिखितमिदं
कवचं द्विवेदीकृष्णदेवात्मजकालूदेवेन ॥ संवत् १८०५ ... आषाढकृष्ण ६ शनौ ॥ ॥

॥ शिव ॥
॥५॥